# 6. सर्वं चारुतरं वसन्ते

[Mahakavi Kalidasa is a renowned poet of Sanskrit as well as of the world. He has written a total of seven works of which Malavikagnimitram, Vikramorvashiyam and Abhijnanashakuntalam are plays, Raghuvamsham and Kumarasambhavam are long poems (Mahakavya) and Ritusamharam and Meghadootam are Khandakavyas.

It is believed that Kalidasa was one of the nine gems at the court of Maharaja Vikramaditya. On that basis, it can be estimated that Kalidasa lived during the first century of the Vikrama Era (about 2,000 years ago).

This poet has been hailed as the master of nature as well as of simile. On the one hand, he has personified many objects of nature in Abhijnanashakuntalam, and on the other he has unique, vivid descriptions of nature in Ritusamharam and Meghadootam.

In this lesson, we shall study five verses describing spring (Vasant) from Ritusamharam. We will learn how objects can be described; and also the uses of Tatpurusha Samasa (compound).]

---

द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः
सर्वं प्रिये चारुतरं वसन्ते ॥ 1 ॥

वापीजलानां मणिमेखलानां
शशाङ्कभासां प्रमदाजनानाम् ।
आम्रद्रुमाणां कुसुमानतानां
ददाति सौभाग्यमयं वसन्तः ॥ 2 ॥

कर्णेषु योग्यं नवकर्णिकारं
चलेषु नीलेष्वलकेष्वशोकम् ।
शिखासु पुष्पं नवमल्लिकायाः
प्रयान्ति कान्तिं प्रमदाजनानाम् ॥ 3 ॥

गुरूणि वासांसि विहाय तूर्णं
तनूनि लाक्षारसरञ्जितानि ।
सुगन्धिकालागुरुधूपितानि
धत्ते जनः काममदालसाङ्गः ॥ 4 ॥

किं किंशुकैः शुकमुखच्छविभिर्न भिन्नं
किं कर्णिकारकुसुमैर्न हतं मनोजैः ।
यत्कोकिलः पुनरयं मधुरैर्वचोभिः
यूनां मनः सुवदनानिहितं निहन्ति ॥ 5 ॥

– ऋतुसंहारे

## Glossary

**Noun : (masc.) : द्रुमः** tree **प्रदोषः** beginning of a night **प्रमदाजनः** young ladies, women **आम्रद्रुमः** mango tree

**(Neu.) : सलिलम्** water **किंशुकम्** Kinshuk (Kesudo) flower

**Pronoun : सर्वम्** all, every

**Adjective : चारुतर** more beautiful **चल** moving **गुरु** thick

**Adverb : तूर्णम्** quickly, hurriedly

**Compound :** वापीजलानाम् (वापीनाम् जलानि–वापीजलानि, तेषाम् । षष्ठी तत्पुरुष) । मणिमेखलानाम् (मणीनाम् मेखलाः–मणिमेखलाः, तेषाम् । षष्ठी तत्पुरुष) । आम्रद्रुमाणाम् (आम्रस्य द्रुमाः–आम्रद्रुमाः, तेषाम् । षष्ठी तत्पुरुष) । कुसुमानतानाम् (कुसुमैः आनताः–कुसुमानताः, तेषाम् । तृतीया तत्पुरुष) । लाक्षारसरञ्जितानि (लाक्षायाः रसः–लाक्षारसः, षष्ठी तत्पुरुष, लाक्षारसेन रंजितानि–लाक्षारसरंजितानि, तृतीया तत्पुरुष) । कर्णिकारकुसुमैः (कर्णिकारस्य कुसुमानि–कर्णिकारकुसुमानि, तैः । षष्ठी तत्पुरुष) । सुवदनानिहितम् (सुवदनासु निहितम् । सप्तमी तत्पुरुष)

## Notes

**(1) Meaning : सपुष्पाः** with flowers (full of flowers) **सपद्मम्** with lotuses **सकामाः** full of desires, love **वापीजलानाम्** of water of lake, pond **मणिमेखलानाम्** wearing waistband of jewells **शशाङ्कभासाम्** having lustre like moon **कुसुमानतानाम्** bent with the load of flowers **ददाति** gives **नवकर्णिकारम्** fresh Karnikara flower **अलकेषु** in hair **कान्तिं प्रयान्ति** attain beauty **वासांसि** clothes **विहाय** (वि + हा + त्वा > य) leaving, abandoning **तनूनि** thin, flimsy **सुगन्धि-कालागुरु-धूपितानि** full of fragrance of black Agaru (a kind of sandal wood) **धत्ते** holds **काम-मद-अलस-अङ्गः** having a body feeling lethargy due to ecstacy of love **शुक-मुखच्छविभिः** bright like the beak of a parrot **वचोभिः** by words, by cooing **सुवदना-निहितम्** to one residing in a beautiful faced woman **निहन्ति** kills **यूनाम्** of youths

**(2) Sandhi :** पुनरयम् (पुनः अयम्) । दिवसश्च (दिवसः च) । शुकमुखच्छविभिर्न (शुकमुखछविभिः न) । (Similar Sandhi is there in words like कर्णिकारकुसुमैर्न, मधुरैर्वचोभिः).

## Exercises

**1. विकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत ।**

(1) वसन्ते पवनः कीदृशो भवति ? ◯

(क) सुगन्धिः (ख) कठोरः (ग) मृदुः (घ) उष्णः

(2) कः मधुरैः वचोभिः मनः निहन्ति ? ◯

(क) मयूरः (ख) वायसः (ग) कोकिलः (घ) चटकः

(3) रेखाङ्कितपदस्य समासनाम लिखत । – वापीजलानां सौभाग्यं ददाति । ◯

(क) तत्पुरुषः (ख) षष्ठीतत्पुरुषः (ग) द्वन्द्वः (घ) इतरेतरद्वन्द्वः

(4) 'पद्म' शब्दस्य अर्थः कः ? ◯

(क) lotus (ख) leg

(ग) wooden clogs (पादुका) (घ) crop

(5) 'वदनम्' शब्दस्य पर्यायशब्दं चित्वा लिखत । ◯

(क) वादः (ख) मुखम् (ग) वादनम् (घ) वाद्यम्

**2. अधोलिखितानां प्रश्नानां संस्कृतभाषया उत्तराणि लिखत ।**

(1) वसन्तः सौभाग्यरसं कस्मै ददाति ?

(2) अलकाः कीदृशाः सन्ति ?

(3) लाक्षारसरञ्जितानि वासांसि कीदृशानि सन्ति ?

(4) यूनां मनः कः हन्ति ?

(5) वसन्ते जलं कीदृशं भवति ?

**3. मातृभाषायाम् उत्तराणि लिखत ।**

(1) What does the Spring season give and to whom ?

(2) On the basis of poem write five sentences on the Spring.

**4. क-विभागं ख-विभागेन सह यथार्थरीत्या संयोजयत ।**

| क | ख |
|---|---|
| (1) सलिलम् | (1) अलकेषु |
| (2) प्रदोषाः | (2) विहाय |
| (3) प्रमदाजनानाम् | (3) तनूनि वासांसि |
| (4) गुरूणि वासांसि | (4) सपद्मम् |
| (5) जनः धत्ते | (5) सुखाः |
| | (6) पवनः |

**Activity**

- Collect other such descriptions of the Spring from the Sanskrit literature and write it.

•